Foundation Lecture Book Series - 1

संस्थापनाविशेषोपन्यासग्रन्थमाला–१

भारतीयमनश्शास्त्रस्य मूलतत्त्वानि

विद्यावाचस्पतिः पद्मश्रीः

बन्नञ्जे गोविन्दाचार्यः

प्रसाराङ्गम्

कर्नाटकसंस्कृतविश्वविद्यालयः

पम्पमहाकविमार्गः, चामराजपेटे, बेङ्गलूरु – ५६००१८

Foundation Lecture Book Series - 1
संस्थापनाविशेषोपन्यासग्रन्थमाला–१

भारतीयमनश्शास्त्रस्य मूलतत्त्वानि

विद्यावाचस्पतिः पद्मश्रीः
बन्नञ्जे गोविन्दाचार्यः

कर्नाटकसंस्कृतविश्वविद्यालयः
पम्पमहाकविमार्गः, चामराजपेटे, बेङ्गलूरु – ५६००१८

BHARATEEYA MANASSHASTRASYA MOOLATATTVANI

by **Vidyavachaspati Padmashri Bannanje Govindaracharya**

Chief Editor

Prof. Mallepuram G. Venkatesha

Published by

Registrar

Karnataka Samskrit University

Pampa Mahakavi Road, Chamarajpet

Bangalore - 560018.

Ph: 080 - 2670 1303, 2670 5387

First Impression: 2011

Copies: 500

Page: ii + 14 = 16

Price: **Rs.**

Paper used: **70GSM NS book print**

Printed at:

भारतीयमनःशास्त्रस्य मूलतत्वानि

अथातः प्रतनमनोविज्ञानजिज्ञासा ।

आचक्षते केचिदविज्ञातप्रतनविज्ञानाः स्वयम्प्राज्ञम्मन्याः मनोविज्ञानमितीदं पश्चिमदेशविदुषामुपायनमिति । तावन्तं कालमविदितं भारतीयानामिति । भगवान् भ्रमोऽयमाधुनिकशिक्षणग्रस्तमनीषतया स्वयमनाघ्रातपुरातत्व-गन्धानामुपनिषदन्धानाम् । अयि पश्चिमबुद्धे, अपसारय नेत्रपट्टिकाम् । उन्मीलय लोचने । तर्हि जानीषे किं तथ्यं किमतथ्यमिति ।

पश्चिमदेशीया विपश्चितो मन्यन्ते— तत्वशास्त्रमन्यत्, मनःशास्त्रं चान्यदिति । नेयं भारतीयानां चिन्तनसरणिः । तेषां तत्वशास्त्रं मनःशास्त्रमित्यद्वैतम् । तत्वशास्त्रस्य महाद्रुमस्य विस्तारोऽयं मनःशास्त्रमिति । अथ तत्वशास्त्रपतत्रिणो द्वे गरुती इमे सङ्ख्याशास्त्रं मनःशास्त्रमिति । न तत्वशास्त्रमुड्डयनाय प्रभवति विना ताभ्यां गरुद्भ्याम् ।

युक्ता चेयं भारतीया प्रक्रिया । विना तत्वविज्ञानं कथं मनस आन्तरी गतिर्विज्ञायेत । ऋते वा मनसो विज्ञानात् कथमप्रबुद्धमनसां मनोविज्ञानम् । तस्माद् युक्ततमः पन्थाः— तत्वविज्ञानमेव मनोविज्ञानमिति । कथमतत्वविन्मनस्तत्व-विज्ञानी बुभूषति । कथं वा मनसस्तत्वमजानन् तत्वशास्त्रज्ञो बुभूषति । तदिदमौपनिषदमादेशनम्—'घृतमिव पयसि निषक्तं भूतेभूते च वसति विज्ञानम् । सततं मन्थयितव्यं मनसा मन्थानभूतेन' इति । यादृशेन

शिक्षणेन मानसं साधुपथे साधकं नयेत् तथा मनसः परिणयनमेव हि तत्वशास्त्रस्य विषयः । तदेव च वेदान्तविज्ञानमित्युच्यते ।

सर्वाः प्रकृतयः काममूला इति फ्रायड्प्रभृतयो मन्यन्ते । मन्त्रवर्णोऽपि संवदते–'कामः कर्ता नाहं कर्ता, कामः कारयिता नाहं कारयिता' इति । सत्यमिदम् । अथापि खण्डतथ्यम् । अवारदर्शनमिदम् । न पारदर्शनम् । पारवारीणास्त्वन्यदेव मन्यन्ते । निष्कामकर्मनिरता जितकामास्तपस्विनो भूयांसो बभूवुः । सन्ति च भविष्यन्ति च । तेषां मनोविज्ञानं कीदृशं स्यादिति कथं पश्चिमप्रज्ञा विजानीयुः । कल्पनातीतमिदं तेषाम् । यदकामनया कर्मभावना, स्त्रीमात्रे मातृत्वभावना च । यदाह ऐतरेयी उपनिषत्– 'सा भावयित्री भावयितव्या भवति' इति । का सा? या स्त्री गर्भं बिभर्ति । सा किं भावयित्री? गर्भगतस्य परमात्मनः पुत्रत्वेन भावयित्री भवति । तस्मात् सा गर्भगृहाधिष्ठितभगवत्प्रतिमं देवमन्दिरमिव सादरं सम्भावयितव्या भवति ।

एवं गहने मनसि प्रगाढमवगाढानामन्यदेव विज्ञानं भवति । उपरि तरङ्गमालायां प्लवमानानामन्यदेव । ये पुनरातळमवगाहन्ते तेऽनर्घानि रत्नात्याचित्याऽहरेयुः । ये क्रियासमभिहारेण प्लवन्ते ते परं लावण्यमास्वदन्ते । पाश्चात्यं विज्ञानं लावण्यमास्वादयति । पौरस्त्यं चिरत्नानि रत्नान्याहृत्योपदां करोति । 'अब्धिर्लङ्घित एव वानभटैः किन्त्वस्य गम्भीरतामापाताळनिमग्नपीवर-तनुर्जानाति मन्थाचलः' ।

तदिदं मनोऽन्नमूलमाहुरौपनिषदाः–'अन्नमशितं त्रेधा विधीयते । तस्य यः स्थविष्ठो धातुस्तत् पुरीषं भवति । यो मध्यमस्तन्मांसम् । योऽणिष्ठस्तन्मनः' इति । छन्दोगानामुपनिषदियम् । ततश्च 'अन्नस्य अश्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति तन्मनो भवति । अन्नमयं हि सोम्य मनः' इति । स यथा 'दध्नः सोम्य मथ्यमानस्य योऽणिमा स ऊर्ध्वः समुदीषति, तत् सर्पिर्भवति, एवमेव' ।

अत एव चोक्तमन्यत्र–‘आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः’ इति । यादृशमाहारं नरा अभ्यवहरन्ति तादृशं तेषां मनो भवति । अत एव गीतायामाहारत्रैविध्यं प्रत्यपादि भगवता वासुदेवेन। सात्विकेनाऽहारेण भुक्तेन मनः सात्विकं भवति । राजसेन राजसम् । तामसेन तामसम् । सात्विके सात्विकं चिन्तनं भवति । सात्विकी क्रिया । एवं राजसे तामसे च । तदिदमाहारसङ्गतं मनोविज्ञानं भगवद्वासुदेवोपज्ञमविज्ञातचरं पाश्चात्यानाम् । ते किलाऽहारं केवलं देहपोषणं मन्यन्ते, न मनःपोषणम् ।

आहारश्च मानसो द्विविधो भवति– अन्नमयो ज्ञानमयश्चेति । तेन तत्वदृशां विदुषां चरणशुश्रूषया विद्याया आहरणं चेह आहारपदार्थः । विद्यया च समाहृतया मनः सुसंस्कृतं सुकृतपथसञ्चरणचणं स्यादिति । ‘गुरोर्विद्याऽऽहृतिर्या तु स आहार उदाहृतः’ इति च स्म हि स्मरन्ति । स्वच्छे मनसि प्रतिफलितं न स्खलति । सत्यां च सत्वशुद्धौ प्रसन्नसलिलं सर इव प्रतिफलनदक्षं प्रसीदति । तेन ध्रुवा स्मृतिरवतिष्ठते ।

तदिदं पञ्चविधमन्तःकरणमाचक्षते–मनो बुद्धिरहङ्कारश्चित्तं चेतनेति । तन्मनः यत् केवलं सङ्कल्पयति च विकल्पयति च । न किमपि निर्णेतुमीष्टे । नापि कस्यचित् स्मरति । कश्चिद् बाल आपणे प्रियं क्रीडनकं काष्ठपुत्तलिकां पश्यति । तन्मे स्यादित्याकाङ्क्षति । ततः सोऽन्यत् ततोऽपि मनोज्ञतरं क्रीडनकं पुस्तं पश्यति । तदपि तस्मै रोचते । स तदा सन्देग्धि । किमिदमदो वा क्रीणीयेति । महिळा काचिदपूर्वविन्यासमनर्घं वास आपणे पश्यति । तन्मे स्यादित्याकाङ्क्षति । ततः साऽन्यत् मधुरवाणि वासः पश्यति । तदपि तस्यै रोचते । सा सन्देहे निमज्जति इदमदो वा वासः क्रीणीयेति । कश्चिद् युवा काञ्चिदनन्यसुषमां मनोरमां रामां पश्यति । सा मे स्यादित्याकाङ्क्षति । ततः स काञ्चिदन्यां धन्यां कन्यां पश्यति नेत्रान्तनिरीक्षणमात्रेण चित्तक्षपणीम् । तदा सोऽनिर्णये पतति– इमां तां

वा वरेयेयेति । तदिदं द्वयं मनसः क्षेत्रम्– इच्छा च अनिर्णयश्च । तदुक्तम्– 'सङ्कल्पविकल्पात्मकं मनः' इति ।

अथ ततोऽप्यान्तरः अन्तःकरणस्य द्वितीयः समुद्गको भवति बुद्धिर्नाम । 'व्यवसायात्मिका बुद्धिः' इत्याहुः । तेन मनसि रूढं सन्देहं बुद्धिर्निर्णयदानेन परिहरति । इदमेव नादः, इयमेव न सा इति निर्णयनी बुद्धिर्निश्चिते कार्ये प्रवर्तयति । येषां बुद्धिर्न प्रबुद्धा पृथुकानामिव ते शङ्काप्रेङ्खामेवाऽरूढा दोलायन्ते ।

तदिदमुक्तमुपनिषद्दर्शिभिरृषिभिः–'इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः' इति । काठकानामिदमाविष्करणम् । विवृतं चैतद् विस्तरतो मनोविज्ञानम्–'आत्मानं रथिनं विद्धि शरीरं रथमेवच । बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च । इन्द्रियाणि हयानाहुर्विषयांस्तेषु गोचरान् । आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः । यस्त्वविज्ञानवान् भवत्ययुक्तेन मनसा सदा । तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः । यस्तु विज्ञानवान् भवति युक्तेन मनसा सदा । तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः । यस्त्वविज्ञानवान् भवति भवत्यमनस्कः सदाऽशुचिः । न स तत् पदमाप्नोति संसारं चाधिगच्छति । यस्तु विज्ञानवान् भवति समनस्कः सदा शुचिः । स तु तत् पदमाप्नोति यस्माद् भूयो न जायते । विज्ञानसारथिर्यस्तु मनःप्रग्रहवान् नरः । सोऽध्वनः पारमाप्नोति तद् विष्णोः परमं पदम्' इति । अद्भुतमिदं मनोविज्ञानं यदविदितवेदान्तानां पश्चिमप्रज्ञानां स्वप्नेऽपि नावतरति । परिस्फुटमत्र ह्युदघोषि तत्वशास्त्रमनःशास्त्रयोरद्वैतम् ।

विस्मयावहमिदमा प्रायणान्तमध्यात्मप्रयाणम् । अत्राऽत्मा साधकः स्वयं रथी । उपासकजीवो रथिवत् उद्यमशीलो भवेदित्यर्थः । शरीरमेव च रथः । शरीरं रथइव च । 'एवौपम्येऽवधारणे' । अध्यात्मप्रयाणे शरीरमेव रथो

नान्य इति च । बुद्धिरेव सारथिरश्वनियन्ता । नियमनं च प्रग्रहेण भवति । प्रग्रह इत्यभीषुः । अश्वसंयमनरज्जुः । मन एव रथाश्वानां संयमनरज्जुः । नन्वभीषुणाऽश्वाः संयम्यन्ते । केऽत्राश्वाः । इन्द्रियाणि हयानाहुः । बुद्ध्या व्यवसाय मनसा संयम्य अश्वा नियन्तव्याः, येनापथेन गत्वा गर्ते न पतेयुः ।

अत्र किञ्चिदपूर्वं प्रमेयं श्रुतिराविष्करोति । द्विविधं मनो भवति । बाह्यं स्वरूपभूतं च । बाह्यं मनो मनःशास्त्रविषयः । स्वरूपभूतं मनः साक्षात्कारसाधनम् । तदिदमविषयो मनःशास्त्रस्य । तदिदमुक्तम्–आत्मस्वरूपभूतैरिन्द्रियैर्मनसा च ध्यानयोगे संस्थितं साक्षात्कृतपरतत्वं नित्यसुखभोक्तेत्याहुर्मनीषिणो ये मनसामीशते, येषां न जातु मन ईष्टे । विज्ञानमिति बुद्धिरुच्यते । अविज्ञानवान् बुद्धिहीनः, विवेकविधुर इत्येतत् । विज्ञानवान् विवेकी । श्रुतौ समनस्कं इत्युपलक्षणम् । स्वाधीनमन-आदीन्द्रियः । स्वाधीने मनसि सर्वाणीन्द्रियाणि स्वाधीनानि भवन्तीति प्राधान्यात् समनस्क इत्युक्तम् । मनसः साहित्यं नाम स्वावश्यमेव । अस्ववशमना ह्यमनस्क उच्यते । विज्ञानसारथिरिति बुद्धिसारथिः । तदिदं वैदिकं मनःशास्त्रम् ।

नह्यविदितमनस्तत्वो जितमना भवितुमर्हति । नह्यजितमनास्तत्वज्ञानी भवितुमर्हति । तेन मनस्तत्वज्ञ एव तत्वज्ञानपथे सञ्चरणमर्हतीति मनोज्ञमिदं तत्वशास्त्रमनःशास्त्रयोरविनाभवनम् ।

गीतायामप्येतदुक्तम्–'इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः । मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः' इति । कोऽयं बुद्धेः परतः सः? नैकः । बहवस्ते भवन्ति । प्रथमं तावदहङ्कारः । अहमिदं पश्यामि, ममेदं प्रियमित्यहम्प्रत्ययः । ऋते तस्मात् बाह्यस्य जगत आत्मना सम्बन्ध एव न सम्भवति । तेनेदमस्वं स्वं भावयति । तदिदमस्वस्य स्वीभवनमस्वस्य स्वीकरणं नाम । बाह्यप्रपञ्चस्य स्वस्वामिसम्बन्ध एव प्रपञ्चो नाम संसारबन्धः ।

अहं ममेति बन्धः । नाहं न ममेति मुक्तिः । सोऽयं समग्रः प्रमादात्मको बन्धोऽहङ्कारमूलः । अस्वीयस्य स्वीयत्वपरिभावना । सोऽयमभूत-तद्भावोऽहङ्करणधर्मः ।

एवं सत्यं चासत्यं चाऽत्मसात्करोत्यहङ्कारः । भ्रमं च यथार्थज्ञानं च । अथ मनसश्चतुर्थः समुद्गको भवति– चित्तमिति । 'चित्तं स्मरणकारणम्' इति चाऽचक्षते । तेन भूतार्थपरिज्ञानं चित्तविषय इत्युक्तं भवति । मन इन्द्रियैर्विषयमादत्ते । बुद्धिर्निश्चिनोति । अहङ्कारोऽभिमन्यते । सर्वमपि वर्तमान-सम्बन्धि । अहमिदं पश्यामि, अहमिदं शृणोमि, अहमिदं करोमीति । कथमथ ज्ञानस्य भूतकालीनत्वम्? अहमिदमपश्यम्, अहमिदमशृणवम्, अहमिदमकरवमिति? तदिदं चित्तस्य क्षेत्रम् । अयमेव विज्ञानमयः कोशः । यतः पूर्वाधिगतं स्मारंस्मारं तेनानुभवेन जनितपाठः पुमान् विज्ञानरङ्गे वर्धते । तेन ज्ञानी विज्ञानी भवति ।

स्मृतिर्हि अनुमितिं जनयति । मतिं च विस्तारयति । पूर्वं यत्रयत्र धूममपश्यं तत्र सर्वत्र वह्निमपश्यम् । धूमवांश्चायम् । तेनावश्यं वह्निमानिति । एवं पूर्वस्मृतिजननी युक्तिर्भवति । ततश्च प्रत्यक्षा-गमाभ्यां स्मृताभ्यां तर्कगर्भिणी मतिर्भवति । यदा स्मृतिर्दोषवती तदा गर्भः स्रवति । अन्यथा मतिस्तर्क-तनयं काले प्रसूते । सोऽयं तर्कपोतो विज्ञानं जनयति । तदेवं चित्तं मनुकुलस्य महद् वित्तम् ।

बहुषु जननेषु सञ्चितमनन्तपारं विज्ञानमन्तर्निलीनमास्ते । तेषु अस्मिन् जननेऽनुभूतानि कानिचिदेव स्मर्तुं प्रभवामः । अवारपारमन्तःकरणस्य क्षेत्रमिदं सदैव पिहितकवाटं भवति । एकस्य स्मरन् शतानां विस्मरति । यदा योगबलेन अन्तःकरणं विवृताररं भवति तदा सर्वमपि स्मृतिपथमायाति । पूर्वजन्मनि कृतम्, पूर्वतरे जन्मनि कृतम्, शतजन्मतः पुरा कृतम्, सर्वमपि । सर्वं भूतं वर्तमानायते । इयमेका योगजा स्थितिः । सोऽयं चित्तस्य

विस्तारश्चेतना नाम । यदाहुः–'बहुस्मरणशक्तिस्तु चेतनेत्यभिधीयते' इति । तेन चेतनेति नान्तःकरणस्य सम्पुटान्तरम् । किन्तु चित्तस्यैव समग्रं कवाटोद्घाटनम् । अत एव प्रतनाश्चेतनां चित्तेनैकीकृत्य चतुर्विधं क्वचिदन्तःकरणमाचक्षते । तथाहि भागवते–'मनो बुद्धिरहङ्कारश्चित्तमित्यन्तरात्मनः । चतुर्धा लक्ष्यते भेदो वृत्त्या लक्षणरूपया' इति । विवृतं चैतदन्यत्र–'बुद्धिरध्यवसानाय संशयं कुरुते मनः । अभिमाने त्वहङ्कारश्चित्तं स्मरणकारणम्' इति ।

यदि महत्तत्वात्मकं चित्तं नाभविष्यत् घटकुड्यादिवत् चेतनोऽपि निर्व्यापारोऽभविष्यत् । कृतस्य स्मरणाभावात् । कर्तव्यस्य मननासम्भवाच्च । स्मरणेन बाह्यव्यापारकुशलो वर्धते, अखण्डस्मरणेन ध्यानलक्षणेन भगवद्योगमारुरुक्षति । तदिदं चित्तं प्रसन्नसलिलमिव सदा पारदर्शकमपारदर्शकं च सत् स्वच्छं भवति, अविकारि भवति, शान्तं च भवति । यद्यस्वच्छमशान्तमभविष्यत् नाजनयिष्यत् तदा स्मृतिम् । तदुक्तम्– 'स्वच्छत्वमविकारित्वं शान्तत्वमिति चेतसः । वृत्तिभिर्लक्षणं प्रोक्तं यथाऽपां प्रकृतिः परा' इति । वृत्तिरिति स्वभावः । वृत्तिभिर्लक्षणमिति स्वाभाविकं लक्षणमित्यर्थः । अविकारित्व-मित्यल्पविक्रिया । अनुदरा कन्येतिवत् ।

यदाऽधिकमधिकमविकारि भवति, स्वच्छं स्वच्छतरं स्वच्छतमं भवति, शान्तं शान्ततरं शान्ततमं भवति, तदा चित्तमेव चेतना भवति । जम्बालकलिलं सलिलमिव मनः । प्रसन्नगभीरं स्तिमितोदकं सर इव चित्तम् । तदिदं प्रतनं भारतीयं मनःशास्त्रम् । भारतीयैरेव विस्मृतं च पश्चिमबुद्धिभिः ।

अथेदानीं किञ्चिदपूर्वं भारतोपज्ञं मनोज्ञं मनःशास्त्रमनुसन्धेयं भवति । संशयस्थानं मन इत्यगादि । 'चित्तं स्मरणकारणम्' इति च । एवं गते किञ्चिदन्यदेवापूर्वतमं मनोविज्ञानमाविरकुर्वन् प्रतना महर्षयः । तथाहि बुद्धिलक्षणप्रसङ्गे भागवते पठ्यते–'संशयोऽथ विपर्यासो निश्चयः स्मृतिरेव च । स्वाप इत्युच्यते बुद्धेर्लक्षणं वृत्तिभिः पृथक्' इति । इदमदो वेति संशयः ।

विपर्यासो विपरीत-ज्ञानम् । इदमेवेति स्थिरज्ञानं निश्चयः । स्मृतिरिति स्फुटोऽर्थः । स्वाप इत्यज्ञानम् । तानीमानि बुद्धिक्षेत्राणीति । अपूर्वमिदं दर्शनम् । क्रान्तदर्शनं विना न शक्यमवगन्तुम् ।

युक्तं क्वचिद् विपर्यस्य विपरीतं पश्यति बुद्धिरिति । निर्णयनं बुद्धिवृत्तिः । न शक्यं निर्णयेन यथार्थेनैव भाव्यमिति नियमः कर्तुम् । युक्तं क्वचिदज्ञानपिधाना स्वपिति बुद्धिरिति । युक्ततरं निश्चिनोति बुद्धिरिति । इदमिह नावबुध्यामहे यद् बुद्धिः संशेत इति, अथ बुद्धिः स्मरतीति । ननु भोश्चित्र-मिदम् । का वृत्तिस्तर्हि मनसश्चित्तस्य च । न भोः, इदमपूर्वमार्षं दर्शनं प्रतनानाम् । अपूर्वमाविष्करणं मनोविज्ञानरङ्गे । तथाहि द्विविधः संशयो भवति- अचलश्चलश्चेति । चलः संशयो मानसः । अचलो बौद्धः । यमाहुरर्वाचीना– 'Intellectual doubt' इति ।

तत्र चलः संशयो यथा–दूरे रज्जुं कश्चिद् ददर्श । रज्जुर्वा सर्पो वेति समशेत । ततः समीपमा-ससाद । रज्जुरियमचलनान्न सर्प इति निर्णिनाय । अथापि संशीतिलेश अवाशिष्यत- परेतः सर्पः स्यादिति । ततोऽवनमय्य शिर उपगत्य पस्पर्श । अथ दृढं निर्दधार रज्जुरेवेयमिति । अयं चलो मानसः संशयः । निरपायोऽयं यतो निवर्तते ।

अथाचलः संशयः । स यथा– कश्चित् समदिग्ध अस्ति भगवान् नवेति । अयं तर्कमूलो विशयः । अस्तीत्येके नायमस्तीति चैके । अस्तिवादिनोऽपि भूयिष्ठं तर्कमुदृङ्कयन्ति । नास्ति-वादिनोऽपि । तत् कस्मिन् विश्वसेयम्, कथं निर्णयेयमिति सञ्चलितो विबभ्राम । तेनायं विशयो बुद्धिविषयः, न मनोविषयः । तर्कमूलत्वात् । सर्वोऽपि तर्कः प्रायः प्रतितर्केण कालात्ययापदिष्टो भवति । आचक्षते– न तर्केण किमपि साधयितुं शक्यते, यतस्तर्केण यत्किमपि साधयितुं शक्यते । अयमप्येकस्तर्क इति । यस्य बुद्धिबलमधिकं वाग्बलं च स विजयते । न सत्यम् । अत एवाऽहुः–'मतं तु दुर्बलं मन्ये मतिरेव गरीयसी' इति । 'नैषा तर्केण मतिरापनेया प्रोक्ताऽन्येनैव सुज्ञानाय प्रेष्ठ'

इति श्रुतिः। 'शुष्कतर्कं तु वर्जयेत्' इति स्मृतिः ।प्रत्यक्षागमाभ्यामननुगतत्वमेव तर्कस्य शुष्कता नाम । अत एव बादरायणसूत्रं च जागरयति नः– तर्काप्रतिष्ठानादिति। तर्कयति निर्णयति चेति विप्रतिषिद्धमेतत्। तेनाचलोऽयं बुद्धिजः संशयो भवति। आपश्चत्वं न निवर्तते। मानसेन संशयेन क्षणिकं चापलं स्यादिति नातितरां तेन बाधकम् । यः संशयं तर्कमुग्धो बुद्धावारोहयति गता तस्य कथा । आमरणं सन्देह एव शरणम् । त्रिशङ्कुनाकोऽयम् ।

एवं स्मृतिरपि द्विविधा भवति– चरा स्थिरा चेति। चरा यथा– कश्चित् प्रवचनं शृणोति। श्रुत्वा निशान्तमापतति। श्रुतमागूर्य चिन्तयति। सर्वं यथावत् स्मरति। श्वः प्रगे सर्वं लिपिबद्धं करणीयमिति निर्णीय निद्राति। प्रातरुत्थाय स्मर्तुं प्रयतते। न प्रभवति । प्रायः सर्वेषामियं दशा । अयं बुद्धिजो निर्णयः । बुद्धिजा स्मृतिः । बुद्धेरियं वृत्तिः यत् सपदि स्मरति, सपद्येव विस्मरति ।

यत् श्रुतं तदसकृदाम्रेडयितव्यं यावता बुद्धिर्न विस्मरति। तदा श्रुतं सर्वमपि चित्ते मुद्रितं भवति । तदिदं स्थिरं स्मरणं नाम । चित्तस्य वृत्तिरियम्। यतश्चित्तं स्मरत्येव, न कदाऽपि विस्मरति। कदाचित् स्मृतिपथमनारूढमपि, न नश्यति। अन्तर्निलीय तिष्ठति। जन्मान्तरीयस्मरणानीव। यदा सुप्तप्रज्ञा जागर्यते तदा स्मरति। तदिदमुक्तम्–'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति। चित्ते चिरमुद्रणार्थमाम्रेडनमेव मननमुच्यते। सोऽयमचलस्मृतिहेतू रोमन्थः। अत एवाऽह बादरायणो वेदान्तसूत्रे–'आवृत्तिरसकृदुपदेशात्' इति ।

तदिदं सर्वमुक्तं प्राचीनसाङ्ख्यशास्त्रे–

सामान्यात् मनसा ज्ञानं विशेषाद् बुद्धिजं भवेत् ।
अचलः संशयो बुद्धेश्चलो मानस उच्यते ।
चञ्चला तु स्मृतिर्बुद्धेश्चित्तजैव स्थिरा स्मृतिः' इति ।

तामेतां स्थिरां स्मृतिं श्रुतिश्छन्दोगानामेवमुपश्लोकयति–

> **'स्मरो वा आकाशाद् भूयान्, तस्माद्यद्यपि बहव आसीरन्नस्मरन्तः, नैव ते कञ्चन शृणुयुः, न मन्वीरन्, न विजानीरन्, यदा वाव ते स्मरेयुरथ शृणुयुरथ मन्वीरन्नथ विजानीरन् । स्मरेण वै पुत्रान् विजानाति, स्मरेण पशून्, स्मरमुपास्स्वेति' इति ।**

अस्याः स्थिरस्मृतेर्मानी सदाशिव इति वैदान्तिकं मनोविज्ञानम् । 'सदाशिवः । स्थिरस्मृत्यभिमानी स सममेव रतेः स्मरः' इति च प्राचीनम् । अत एव च शिवं स्तुवन्ति–

> **'महेश महितोऽसि तत्पुरुष पूरुषाग्र्यो भवान्**
> **अघोर रिपुघोर तेऽनवम वामदेवाञ्जलिः ।**
> **नमः सपदिजात ते त्वमिति पञ्चरूपोऽञ्चितः**
> **प्रपञ्चय च पञ्चवृन्मम मनस्तमस्ताडय' इति ।**

★ ★ ★ ★ ★

याज्ञवल्क्योपज्ञमपूर्वं मानवीयं मनश्शास्त्रं बृहदारण्यकोपनिषदुपस्थापयति–

> **'न वा अरे पत्युः कामाय पतिः प्रियो भवति। आत्मनस्तु कामाय पतिः प्रियो भवति । न वा अरे जायायै कामाय जाया प्रिया भवति । आत्मनस्तु कामाय जाया प्रिया भवति । न वा अरे पुत्राणां कामाय पुत्राः प्रिया भवन्ति । आत्मनस्तु कामाय पुत्राः प्रिया भवन्ति । न वा अरे वित्तस्य कामाय वित्तं प्रियं भवति । आत्मनस्तु कामाय वित्तं प्रियं भवति । न वा अरे लोकानां कामाय लोकाः प्रिया भवन्ति। आत्मनस्तु कामाय लोकाः प्रिया भवन्ति। न वा अरे देवानां कामाय देवाः प्रिया भवन्ति। आत्मनस्तु कामाय देवाः प्रिया भवन्ति । न वा एरे सर्वस्य कामाय सर्वं प्रियं भवति । आत्मनस्तु कामाय सर्वं प्रियं भवति' इति ।**

अत्र द्विविधमनुसन्धानं भवति– एकमौपनिषदं तत्वशास्त्रीयम् । एकं जैवनं मनःशास्त्रीयम् । तत्ववादिनां मते आत्मेति भगवानुच्यते । तदिदमुत्तरत्र स्फुटम्–'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः' इति । आस्तां तावत् भगवत्परता । नास्माकं तत्र विवादः । अभगवत्परोऽपि तत्र कश्चिदर्थः स्फुटं स्फुरति मनःशास्त्रीयः । सम्प्रति तत्परा वयम् । तत्र भरोऽस्माकम् । यत एकमेव श्रुतिवचनं तत्वशास्त्रं च भवति, मनःशास्त्रं च । येन तत्वशास्त्रमनःशास्त्रयोरद्वैतं स्फुटगदितं भवति ।

मनुष्यस्वभाववर्णनमिदं मानवीयं मनःशास्त्रम् । तथाहि– पतिर्जायां कामयते । किं कारणम्? यतः स तस्यां प्रीयते । सा तस्य प्रिया भवति । भ्रान्तिरियम् । पतिरात्मन्येव प्रीयते । आत्मैव तस्य प्रियः । जाययाऽऽत्मनः सुखं जायेतेति जायां कामयते । अथ जाया पतिं कामयते । किं कारणम्? यतः सा पतिदेवता पतिव्रता तस्मिन् प्रीयते । स तस्याः प्रियो भवति । भगवती भ्रान्तिरियम् । जायाऽप्यात्मन्येव प्रीयते । आत्मैव तस्या अपि प्रियः । पत्या आत्मनः सुखं भवेदिति, आत्मनो रक्षा भवेदिति पतिं कामयते ।

नन्वस्तु पतिः पतिमेव कामयते, जाया जायामेवेति । जायापती उभावपि पुत्रान् कामयेते । केन कारणेन? यतः पुत्रः स्वजठरे संवर्धित इति, यतः स्वयमेव जायायामजायतेति । वदन्ति हि–'अङ्गादङ्गात् सम्भवसि हृदयादधिजायसे । आत्मा वै पुत्रनामाऽसि' इति । कविरप्याह भवभूतिः– 'आनन्दग्रन्थिरेकोऽयमपत्यमिति पठ्यते' । न वास्तवमिदम् । जायापती आत्मन्येव प्रीयेते । आत्मैव तयोरपि प्रियः । पुत्रेण जातेन स्वयोर्वार्धके निरातङ्कं रक्षणं स्यादिति, तेनाऽत्मनोऽन्ततः सुखं स्यादिति पुत्रान् कामयन्ते ।

नन्वस्तु सर्वमेतत् । पतिर्जाया च आत्मानमेव कामयेते इति । अथ वित्तं कामयन्ते– पतिश्च जाया च पुत्राश्च । वित्तप्राणा हि मानवाः । कस्मै कारणाय? 'वित्तं बन्धुर्वयः कर्म विद्या चैव तु पञ्चमी । एतानि

मान्यस्थानानि गरीयो यद्यदुत्तरम्' इति वचनप्रामाण्यात् वित्तं मान्यस्थानमिति, वयं मान्या भवेमेति, वित्तं सुकृतसाधनमिति, वयं सुकृतिनो भवेमेति । आगतोऽसि पन्थानम् । तर्हि न वित्तं कामयते । वित्तेन मान्या भवेमेति, वित्तेन धन्या भवेमेति, वित्तेन सुखं क्रेतुं शक्नुयामेति वित्तं सर्वे कामयन्त इत्युक्तं भवति । आत्मानमेवान्ततः कामयन्त इत्येवोक्तं भवति । आत्मनः सुखमेव मूलतः कामयन्ते । सुखार्थं वित्तं कामयन्त इति । नहि वित्तार्थमेव कोऽपि वित्तं कामयते ।

एवं लोककामना देवकामना च । नहि लोकार्थं कोऽपि लोकं कामयते । लोकं सम्पाद्य लोकैर-निमेषमालोकितो भवेयमिति, परलोके चाप्सरोभी रमेयेति लोकं कामयते, ऐहिकं पारत्रिकं च ।

एवं न देवा महान्तः पूजनीया इति कर्तव्यबुद्ध्या देवान् कामयन्ते । देवैराराधितैः सम्पदभि-वृद्धिः स्यादिति, उपत्रिंशाऽप्यनूढा तनया उदूढा स्यादिति, आपतितमनिष्टं सर्वात्मना निवर्तेतेति देवान् कामयन्ते । सकामा हि प्रायो देवताभक्तिर्भवति । आत्मसुखमेवान्ततः कामयन्त इत्येतत् तदुक्तं भवति ।

एवमेकान्ततः सर्वप्रियमात्मतत्वं नाम किमिदमिति प्रथममवगच्छ । तस्मिन् प्रतिबिम्बे विज्ञाते बिम्बभूतः परमात्माऽपि विज्ञायेतेति । तदिदम्- God-realisation through Self-realisation इति । पाश्चात्यवेदे बैबल्ग्रन्थेऽप्येतदुक्तम्– 'If you know yourselves, then you will know that you are the sons of a living Father' इति ।

तदिदं समग्रं मनुकुलमात्मकेन्द्रितमिति स्वार्थमात्रपरिनिष्ठितमित्यद्भुतं मानवीयं मनःशास्त्रं इदमुपक्रममाविष्कृतं भगवत्या उपनिषदा ।

अलमौपनिषदचिन्तनभरेण । महाभारतं तावदवलोकयामः । यः पञ्चमो वेद इति विद्वद्भिराद्रियत । समग्रमपि भारतं मनोविज्ञानस्य पठ्यमिति स्वयं

महाभारतमेव घोषयति स्म–'मन्वादि केचिद् ब्रुवते ह्यास्तीकादि तथाऽपरे । तथोपरिचराद्यन्ये भारतं परिचक्षते' इति ।

गुह्यभाषामयस्यास्य पद्यस्य समाहितमर्थं प्रतना एवं व्यवृणत–

सकृष्णान् पाण्डवान् गृह्य योऽयमर्थः प्रवर्तते ।
प्रातिलोम्यादिवैचित्र्यात् तमास्तीकं प्रचक्षते ॥

धर्मो भक्त्यादिदशको श्रुतादिः शीलवैनयौ ।
सब्रह्मकास्तु ते यत्र मन्वादिं तं विदुर्बुधाः ॥

नारायणस्य नामानि सर्वाणि वचनानि तु ।
तत्सामर्थ्याभिधायीनि तमौपरिचरं विदुः' इति ॥

इदमुक्तं भवति– कृष्णनेतृकाणां पाण्डवानां चरितमिदम्, तेनाऽस्तिकानां विजयोऽत्र निरूप्यत इत्यास्तीकं नाम विवरणम् । तदिदं Historical interpretation of the Mahabharata; ऐतिहासिकं निरूपणम् ।

अथ सर्वाणि नामानि सर्वाण्यप्यक्षराणि भगवत्पराणि । तेन 'वासुदेवस्य महिमा भारते निर्णयोदितः' इति वचनमन्वर्थम् । इदं द्वितीयमाध्यात्मिकं नाम विवरणम्– Spiritual interpretation of the Mahabharata. अस्य विवरणस्य सारसङ्ग्रहो श्रीविष्णुसहस्रनामस्तोत्रम् ।

अथ धर्मराजो धर्मं प्रतिनिधत्ते । भीमो भक्त्यादिदशकम्– भक्तिर्ज्ञानं वैराग्यं प्रज्ञा मेधा धृतिः स्थितिर्योगः प्राणो बलमिति । श्रुतादिमर्जुनः– श्रवणं मननं ध्यानमिति । नकुलः शीलम् । सहदेवो विनयम् । अथच नकुलसहदेवौ सहैव वा शीलविनयौ । द्रौपदी विद्यामानिनीति वेदात्मकं शब्दब्रह्म प्रतिनिधत्ते । कृष्णस्तु वेदवेद्यं परं ब्रह्मेति । विनयो नाम स्वभावविशेषः येन जिह्रेत्यात्मप्रशंसया जुगुप्सते च । शीलं सतां पथि पतनम् । अथ विनयः सत्यपि गुणगरिमण्यहङ्कारविरहः । एते मानवीयाः मनुष्यैर्मनसि निरुह्य शिक्षणीया धर्माः । एवमष्टादशमनूनामवबोधकमष्टादशपर्वमयं

महाभारतम् । तदिदं समग्रस्य महाभारतस्य मनःशास्त्रीयं विवरणम्– Psychological interpretation of the Mahabharata. एवं प्रतने राद्धान्ते समग्रमपि महाभारतं मनोविज्ञानस्य पठ्यम् । तस्य सारसङ्ग्रहोऽष्टादशाध्यायमयी भगवद्गीता ।

तेन भगवद्गीता तत्वशास्त्रमपि मनःशास्त्रमपि । मनोव्याधिग्रस्तमर्जुनं मनोरोगचिकित्साविधानविद् भगवान् कृष्णो हि स्वयमगदङ्कारो भूत्वा अर्जुनस्याऽधिमुपशमय्य तं युद्धे प्रवर्तयामास । यदाह कश्चित् पाश्चात्यो मनोरोगभिषक्– Krishna was the first Psychiatrist world had ever witnessed इति ।

तत्वशास्त्रमिति गीतामधीयते सम्प्रदायज्ञाः । यदि मनःशास्त्रमिति मत्वाऽधीयेरन् कश्चनापूर्वः प्रपञ्चः तेषां पुरः प्रकटो भवति । मा वयमेतस्मादपूर्वविज्ञानाद् वञ्चिता भूमेति अध्येयं गीताया मनःशास्त्रीयं मुखम् ।

एवं मनःशास्त्रमयमध्यात्मं भवति । अविदितमनःशास्त्राणां दुरवगाहं तत्वशास्त्रं भवति । अविदिततत्वशास्त्राणां दुरधिगमं मनःशास्त्रं भवति । उभयेऽपि कूपमण्डूका एव । मा वयं कूपमण्डूका भूमेत्यध्येयं भारतीयमाहो सनातनं मनोविज्ञानम् ।

अनन्तपारं मनोविज्ञानम् । उक्तेरन्तो न विद्यत इत्येवोपरम्यते, नतु वक्तव्यमवसितमिति । नमस्तत्वशास्त्रविद्भ्यः, नमो मनःशास्त्रविद्भ्य इति शम् ।

❑

कुलपतिभणितिः

जानन्त्येव हि तत्रभवन्तो भवन्तः गतवर्षे लब्धजन्मनः कर्नाटकसंस्कृत-विश्वविद्यालयस्य द्वैतीयकमिदं वर्षम् । विश्वविद्यालयस्य प्रधानतमम् उद्देश्यद्वयं - वेदवेदान्तादिशास्त्रेषु उन्नताध्ययनव्यवस्थापानं, शोधकार्यञ्चेति । विशिष्य एतद्द्वारा शास्त्रवाङ्मयस्य तत्त्वं समाजे व्यापयितुं विशेषोपन्यास-ग्रन्थप्रकाशनादियोजनाभिः प्रयासः विहितः । तत्र संस्थापनाविशेषोपन्यासमालिकायाम् अकृतप्रवेशेषु नातिप्रथितेषु शास्त्रमार्गेषु अन्तःक्षेत्रीयविषयेषु कृतभूरिपरिश्रमैः विख्यातनामधेयैः विद्वद्वरेण्यैः विशिष्टव्याख्यानानि समायोज्य तदीयवाङ्मयं ग्रन्थरूपेण प्रकाशनीयमति अस्माकं सङ्कल्पः ।

महदिदं प्रमोदस्थानं यत् कर्नाटकराज्यस्य प्रतिष्ठां दिगन्तेषु विस्तारयन्तः विद्वदग्रगण्याः वेदवेदान्तादिशास्त्रमर्मज्ञाः पद्मश्रीबिरुदभाजः विद्यावाचस्पति-बन्नञ्जेगोविन्दाचार्याः प्रथमोपन्यासेन व्याख्यानमालामिमाम् आरभन्ते । भारतीयमनश्शास्त्रस्य मूलतत्त्वानि इति विषयस्तु अस्पृष्टपूर्वः । मनःशास्त्रम् आधुनिकं विज्ञानम् । तत्त्वशास्त्रं मनःशास्त्रं चेति अनर्थान्तरम् । घृतमिव पयसि निगूढं तत्त्वशास्त्रे गूढं मनःशास्त्रम् आविष्कुर्वद्भिः नानाशास्त्रपारदृश्वभिः आचार्यैः अस्मिन् विषये नूतनं भाष्यं व्यरचि । तदत्र विदुषां पुरस्तात् उपस्थापयितुं मोमुदीति नः चेतः ।

भवदीयः विद्वद्वशंवदः

प्रो. मल्लेपुरं जि. वेङ्कटेशः

प्रसाराङ्गम्, कर्नाटकसंस्कृतविश्वविद्यालयः